শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীকৃষ্ণব্রহ্মতন্ত্রপরকালযতীন্দ্র অনুগৃহীতং

# ॥ শ্রী প্রপন্নামৃতস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী প্রপন্নামৃতস্তোত্রম্ ॥

কলযতু কল্যাণগুণং কমলাকুচকুঙ্কুমাঙ্কিতোরস্কম্।
যদুৱংশমৌক্তিকং তৎকিমপি মহস্সর্ৱদাঽপি মম হৃদযম্॥ 1 ॥

ৱন্দে তং দেৱসুতং ৱসুদেৱৱধূস্তনন্ধযং কমপি।
ৱরদং ৱরেণ্যশীলং ৱল্লৱভৱনাত্তলীলমিহ বালম্॥ 2 ॥

ৱ্রজরচিতকেলিসুদতীৱ্রজহৃদযানন্দকন্দলং কিমপি।
ৱ্রজ হৃদয দিৱ্যতেজো ৱৃজিনতমোমূলভেদনপটিষ্ঠম্॥ 3 ॥

লীলামুদিতযশোদং ললিতপ্রস্নিগ্ধমুগ্ধতরৱাদম্।
আকুঞ্চিতৈকপাদং ভজ তেজঃ কিমপি ৱিরচিতাহ্লাদম্॥ 4 ॥

হৃদযনৱনীতচোরং পারদতরলাঙ্ঘ্রিকমলসঞ্চারম্।
পরিলুলিতগোপদারং গৃহাণ যত্নেন কমপি সুকুমারম্॥ 5 ॥

গোপৱধূভোগার্হং শেখরিতানর্ঘবর্হিৱরবর্হম্।
ঘনৱিভৱপারিবর্হং কলযে হৃদযে চিরায দাশার্হম্॥ 6 ॥

গোখুরৱিদারিতাৱনিধূলীধূসরিতকুন্তলমুদারম্।
সঞ্চিন্তযেঽন্তরঙ্গে সকুমারং কমপি ৱল্লৱকুমারম্॥ 7 ॥

কমপি ঘনাঘননীলং গোপৱধূটীকুচগ্রহৱিলোলম্।
কলযামি গোপবালং লোলালকজালমধুকরিতফালম্॥ 8 ॥

কুন্দৱিনিন্দনরদনান্মন্দিতপূর্ণেন্দুবিম্বরুচিৱদনান্।
মুনিহৃদযকেলিসদনান্ৱ্রজৱিভৱাংস্তান্ভজে ৱিধুতমদনান্॥ 9 ॥

নন্দানন্দনচন্দন মুচুকুন্দানন্দকন্দ গোৱিন্দ।
মম ৱিন্দ হৃদরৱিন্দং মিলিন্দসুন্দর মুকুন্দ ননু মন্দম্॥ **10** ॥

কিমপি যশোদাভাগ্যং ৱ্রজললনাপৃথুলকুচযুগীভোগ্যম্।
রক্ষামি নীলরত্নং রমণীযং হৃদযসংপুটে নূত্নম্॥ **11** ॥

মুরলীনিনাদরসভরতরলীকৃততর্ণকৱ্রজো ভজতাম্।
কোঽপি ঘনাঘনশাবঃ কোমলরূপোঽদ্য দহরগহনং মে॥ **12** ॥

কালিন্দীপুলিনান্তরকলিতৱিহারং মনোজ্ঞমণিহারম্।
তেজঃ কিমপি ৱিলীনং জাগর্তু মদীযহৃদি রুচিরলীলম্॥ **13** ॥

কানপি ভজে ৱিলাসান্ কলিতৱ্রজসুন্দরীরুচিররাসান্।
রাধাকটাক্ষদাসান্ রাকাসিতকিরণসখহাসান্॥ **14** ॥

অতিমুগ্ধং দধি লব্ধুং সুস্নিগ্ধং ৱস্তু কিমপি মম সিদ্ধম্।
চারুমুখং তারসখস্মেরনখং তচ্চিরাদপারসুখম্॥ **15** ॥

ৱিকটাতিদর্পদুর্মদশকটাসুরধূতিধুর্যচরণতলম্।
প্রকটানুরাগরুচিরং সুকটাক্ষান্মযি তনোতু তত্তেজঃ॥ **16** ॥

যমুনাকূলৱিহারং যমিনামধুনাঽপি হন্ত বহুদূরম্।
মহদচ্যুতকৈশোরং মম হৃদি ৱিতনোতু নিত্যসঞ্চারম্॥ **17** ॥

বহুতরতরঙ্গঘদ্দিতযমুনাশুক্ত্যুদরগলিতমিৱ নীলম্।
মুক্তাফলং প্রৱিচলত্তত্র ৱিচিত্রং ৱিভাৱযে হৃদযে॥ **18** ॥

সোমাননগোপীজনকৌমারহরং প্রৱাললসদধরম্।
তরুণং কমপি মনোহরচরণং শরণং ভজে ধৃতাভরণম্॥ **19** ॥

খঞ্জিতগোপীহৃদযং রঞ্জিতভুৱনং শ্রযামি গোপশিশোঃ।
সঞ্জীৱিতগোসন্ততি মঞ্জুলমঞ্জীরশিঞ্জিতং নৃত্তম্॥ **20** ॥

কালিযফণমণিমধ্যে নীলতরং নৃত্ত্বজাতমিৱরত্নম্।
তন্মূর্ধন্যস্তপদং চূডালঙ্করণমস্তু ধাম মম॥ **21**॥

সিতকরকিরণত্রস্যদ্গোপীরতিকেলিরচিততিমিরভরম্।
তৎকিমপি ধাম হৃদযে নীলতরং নস্তমো নিরাকুরুতাম্॥ **22**॥

নির্মলতরমতিশিশিরং নিরুপমমৱগাহতাং মনোরুচিরম্।
নন্দকিশোরমনোহরশরীরতেজঃ কলিন্দজাপূরম্॥ **23**॥

মহ ইহ মনসি ৱিলগ্নং মণিমযকাঞ্চীমনোহরৱলগ্নম্।
গোপীকটাক্ষমগ্নং গোপ্তুং ক্ষমমেৱমাং ভৱৱিৱিগ্নম্॥ **24**॥

ৱিন্দে পদারৱিন্দে মন্দেতরৱিভৱদে কৃতানন্দে।
নন্দকুলামন্দকলা বৃন্দৱিলাসস্য কস্যচিদ্ধাম্নঃ॥ **25**॥

ইতি মহিশূরপুরোত্তমনরপতিচামেন্দ্রভূপকুলগুরুণা।
কলিতা স্তুতির্ৱিজযতাং শ্রীকৃষ্ণব্রহ্মতন্ত্রকলিরিপুণা॥ **26**॥

॥ শ্রী প্রপন্নামৃতস্তোত্রং সমাপ্তম্॥